॥अथकुंडकोमुदीग्रंथंप्रारंभः श्रीशंकरप्रसन्न॥

॥श्रीगणेशायनमः॥अथकुंडकौमुदीप्रारंभः॥ जयतिजयतिरामोजानकीजानिरेको दशरथकुलदीपःसच्चिदानंदरूपः॥ दश
मुखमुरचशत्रुछेदविछेदशोभृगुकुलकोद्यन्मानहानिप्रवीण॥१॥सूनोःश्रीपुरुषोत्तमस्यतनयः श्रीमन्मुकुंदास्ययः शंभुःशंभु
रिवापरोदृढमतिःश्रीरामसंचिंतने॥ तत्सुनुर्विविधागमेषु निपुणःश्रीरामदेवानुजो ह्यूतेकुंडमिहांगभेदसहितंश्रीविश्वनाथः
सुधीः॥२॥श्रीपुरुषोत्तमस्यसूनोर्मुकुंदस्ययत्तनयस्तंन्वयः॥ विविधागमाहयशीर्षमहाकपिलपंचरात्राख्यः ग्रहयंथ॥
अंगानिकुंडमेखलोयोनिर्नाभिस्तनानि॥भेदाःचतुरस्रयोन्यर्द्धचंद्रत्र्यस्त्रिवलयषडस्त्रिपद्माष्टास्त्रिरूपाः तत्सहितंउपलक्षणमे
तत् तदुपयोगिमंडपवेदिकलशध्वजपताकादिसहितंचास्पष्टमन्यत्॥१॥ नूतननिर्माणस्यवैय्यर्थ्यमाशंक्यनिराकरोति॥
मधपीरमुदितंबहुधाचेदूषितंतदतिमंदमतीभिः॥आशयानवगतेरितितेषांहार्दमात्रमिहवर्ण्यतेमया॥२॥आर्द्धैः शारदा
तिलक ककाररामबाजपेयीप्रमुखैः॥आशयानवगमे मंदबुद्धित्वंहेतुः॥ नास्मिन्काले नूतनकुंडलक्षणमयोच्यतेकिंतु पुरातन
ग्रंथकराणामभिप्रायमज्ञात्वैकैकग्रंथोद्धावितदूषणैः तेषुग्रंथेषुदुष्टताबुद्धिर्माभूदितितेषामाशयवर्णनमात्रमेवेहक्रियतइति
सफलएवैतद्ग्रंथारंभइतिभावः॥२॥ भूमिंपरिक्ष्यपरिगृह्यनिजोचितांतांशल्यंनिरस्यचमहाकपिलोक्तमार्गतः॥हस्तोच्छ्रितांप्र
हृतितोर्द्धकरोच्छ्रितायासंपाद्ययत्नमुखलोथसमांविदध्यात्॥३॥परीक्ष्यदृयंनिषिद्धादृयमनिषिद्धेतिज्ञात्वा॥निषिद्धामहाकपिल
पंचरात्रेउक्त॥ तत्रभूमीपरिक्ष्येतवास्तुशास्त्रविशारदः स्फुटिताचसशल्याचवल्मीकरोहिणीतथा॥ दूरतःपरिवर्ज्याभूकर्तुरायु
र्धनाशहा॥ स्फुटितामरणंकुर्याद्दूषराधनवर्जिता॥सशल्याक्लेशदानित्यंविशमाग्रहस्समत्रुतोभया॥ तथा॥विद्वेषंमरणंव्याधिं
कुर्याद्विन्नि्रवाभही॥ धर्मराजप्लवाभूमीर्नित्यंमृत्युभयप्रदा॥ग्रहक्षयकरीसाचभूमिर्यानेर्क्षतिप्लवा॥ धनहानिकरीपृथ्वीकी
र्त्तिनाशवरुणप्लवा॥ वातप्लवातथाभूमिर्नित्यमुद्वेगकारिणीति॥ अनिषिद्धातुहयशीर्षपंचरात्रेउक्ता॥ सुरभीणांरतियत्रसवत्सा
नांवृषैसह॥ सुंदरीणांरतियत्रि पुरुषैः सहसत्तम॥ काश्मीरचंदनामोदामदिरासवगंधिनी कमलोत्पलगंधाचजातीचंपकगंधि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नंतथा ऊरूकंडूयमानेनुकांशशल्यंविनिर्दिशेत् हस्तेनैकेनसंतिष्टेच्छ· तवअसतीचभवेत्क्रायविशोहानिश्चजायते हस्तौ
कंडूयमानेकंफालंचविनिर्दिशेत् त्रिहस्तेनसंतिष्टेत्वन्यमानेनचान्यथा· अग्निदाहश्चरोगश्चस·शल्येमरणंभवेत् षष्टंकंडू
यमानेतु बाहुशल्यंविनिर्दिशेत् हस्तेनैकेनसंतिष्टेन्नात्रकार्यविचारणा स्वामिनाशोभवेत्तत्रभार्याधिजायतेऽसती पादौकं
डूयमानेतु हस्तशल्यंविनिर्दिशेत् सार्द्धहस्तेनसंतिष्टेत्तव गोनाशोराजदंडश्चसस्यहानिश्चजायते कुक्षिकंडूयमानेतु पाषाण
स्तत्रनिर्दिशेत् हस्तद्वितयमानेनक·तव· भुजंगदंशस्तत्रस्यात्तस्माच्छल्यंसमुद्धरे जानुकंडूयमानेतु भस्मशल्यंविनिर्दिशेत्
हस्तद्वयेनसंतिष्टेत्क·तव अग्निदाहोमनस्तापःक्लेशदुःखतयानिच करोतिवंविधंकर्मतस्मात्तंवैसमुद्धरेत् गोशृंगंपीतमं
डूकःशंखःशुक्तिश्चकछपः जंबुकश्चप्रशस्तास्युर्यश्चान्यारत्नजातयः अंगारंवैतुषंकेशमस्थिशल्यंविशारयेदिति। तच्च
प्रासादेजलपर्यंतंकर्त्तव्यंतावत्खात्वाशल्यपरिहारः कर्तव्यः।। ।।तदुक्तंहाय·रात्रे।। ।।प्रासादेदोषदंशल्यंभवेच्चावज्जलांकत
कात्ततस्मात्प्रासादिकीभूमिःशोध्यायावज्जलांतकं शिलांतंकर्करांतंवायावद्वाशुद्धलोष्ठंजेत् हेतुपंचहस्तपर्यंतंरचननं त
दुक्तं दूरनिवस्थितंवारिरचनितुंनैवशक्यते पंचहस्तंप्रखातव्यंशल्यदोषोपशांतयेइति· आदियामलोक्तात्रिचलयवक्राश
ल्योद्धारप्रकारस्तुग्रंथविस्ताराभयादतिप्रयत्नसाध्यत्वेनेहलिखितः उक्तप्रकारेणशल्यंनिरस्यप्रछादितःमूलभूमेः अपेक्षया
हस्तोच्छ्रितंअर्धकरोच्छ्रितंवाभूमौसंपाद्यखत्वा।। ।।महाक·त्रेमंडपं·प्रछयोक्तं।। ।।उच्छ्रायोहस्तमानंस्यात्सुसमंचसुशोभ
नेमिति सिद्धांतसेखरे स्थलोद्भवंशिलोच्छ्रायंमंडपस्थलमीरितमितियंत्रमुखतः वक्ष्यमानयंत्रादिनामुखशब्दोजलपरि
ग्रहार्थः किंतुयंत्रंकथंजातेनसमताकरणमित्यपेक्षायांरामोक्तंयंत्रमाह ३ दंडोसूक्ष्माग्रकोद्वौसरलसमीतिमूलभागेनि
युक्तकीलाधैस्तीर्यगंन्यंसममितिभुमयोपांसथोश्चांतरांकं अग्रद्वंद्वेनिरखेसतिचलतियतचिंन्तोमूलबद्धोलंबो
देशंरचनेतंतदितरमर्थापूरयेत्स्थैर्यमांके।। ४ सरलोसमप्रमाणोसूक्ष्माग्रोद्वौदंडौमूलदेशेकिलचर्मरज्जुनामन्यतमे

DR. BHAU DAJI MEMORIAL

नएकीकृत्यग्भूतयोर्द्वयोर्दंडयोरग्रसमीपेअन्यंदंडंतत्तुल्यप्रमाणमध्यक्षतचिन्हंकिलादिनासंबंधंकृत्वाएतावतानिष्पन्नाश्रिकोणस्या
द्वयोर्भूमौस्थापितेसतिमूलेबद्धोलंबोमध्यचिन्हात्यंदेशंप्रतिगछतितंदेशंचिन्होपरिस्थैर्यपर्यंतंमानीयमृदापूरयेत्।।अथवाय
स्मादेशाद्गछतितंदेशंरचनेत् एवंकृतेभूसमाभवेदितिसूत्रार्थः।। ४।।समतायांसुखशब्दपरीगृहीतंप्रकारांतरमाह यद्वाजलेनैवभवेत्स
मत्वंयथातथानैवकदाचिदन्यः।।कृत्वाजलेनैवततः समत्वंतत्रैवकुर्यादिवलुप्तास्तुपूजनं।। ५।।अन्यतः पत्रेणतत्रैवसमीकृता
यांभुविप्रासादाधारंभनिमितंवास्तुपूजनंकुर्यादितिसूत्रार्थः।।एषार्थमन्यत।।तदुक्तं।। हयशास्त्रे।।भूमितोयसमाद्यत्रेतिसिद्धांतसि
रोमणावपि वृत्तेसःसुसमीकृतोस्तितत्रेइति।।मंत्रतंत्रनेत्रे कृत्वाजलेनातिसमांभुवमितिं।। महाक·शास्त्रे।।सर्वान्देवास्तुका
येषुपूजयेद्वास्तुसंस्थितान्।।लेनासोधनमेनोचेदुत्तिष्टेन्माधवाज्ञयेति।।यमेनाप्युक्तं।।गृहाधिकरणेयत्रनार्चिताः।।वास्तुदेवताः
तत्रशून्यंभवेत्सवरिक्षोविघ्नादिभिर्हरेत्।। तस्माद्वास्तुर्चनंकार्यं सर्वसंपद्महिभुभिः।।तथाशुभकर्मणिदीक्षायांमंडपकरणेगृहादिविधि
षु तथाविहितोवास्तुबलिःदृष्टोविघ्नोपशांतिसंपद्भवति·५।। ।।मंडपद्वारकुंडादिकरणस्यदिग्ज्ञानाधिनत्वात्तत्रचशंकुसा
ध्यत्वात्प्रथमंशंकुलक्षणमाह।। ।।शंकुर्यस्त्रियसारदारुघटितोहस्तद्वयमानोव्रणः सूक्ष्माग्रः सरलोदृढः समतलोमूलेपृथुःस्था
पितः भुमोयस्थिरतामुपैतिनिहितोयोवाविशेतादृशोमूलेसूक्ष्मसुरंध्रोपिसुधीनिर्व्यथैवार्द्रोभवेत्सर्वदा ६ खदिरादियस्त्रियासार
दारुसंघाटितो द्वादशांगुलदीर्घो व्रणरहितः सूच्यग्रवत्सूक्ष्माग्रः अवक्रोजरढः मूलभागेस्थूलः लक्षणेनसमतलः शंकुः
कार्यः यः भूमौस्थापितसन्स्थैर्यमुपैति अथवामूलभागेपितादृशः सूक्ष्मसुखः यथाभूम्यासिद्रेस्यादष्टवारंनिहितः सन्
भूमौप्रविशेत् एवंभूद्रिआदर्शश्चशंकुः सर्वकार्येषुभवेदितिसूत्रार्थः महाक·त्रे स्वादिरंविन्यसेच्छंकुंद्वादशांगुलविस्तृतं क्रिया
सारेमंडलद्वयोक्तं द्वादशांगुलमानोऽयंशंकुंस्वादिरनिर्मितेअलाभेयज्ञवास्संभातत्रसंस्थापयेत्सुधीरिति श्रुत्वचपरिशिष्टेषडंगु
लपरिणाहंद्वादशांगुलसुस्थितं जरढंवाव्रणंचैवशंकुंकुर्याद्विचक्षणः परिणाहःसमनलःशंकुपक्षेमूलविस्तारः तथा

एकतश्चक्रुत्सिधः खादिरसमायतः शंकुकार्यस्तुश्रुच्चसैस्तस्याङ्गमयेन्मही: एकतश्चः मूलभागेतश्रुणेनसमतलः तथा शंकुरामशिरः कार्यस्तस्याप्यङ्गंनिखानयेत्॥ अङ्गंनिखननोक्तिस्तुस्रुच्यादिलक्षणार्थी॥ श्रुच्चमाह॥ तत्रशंकुंसमतलं खातंवास्तुसमानेनभूमौ॥ तीक्ष्णशंकोः भूरीषणंतुकरेणकार्यंतदुत्कंश्रुच्चे॥ द्विवितस्तिप्रमाणस्तुखादिरोसुकरः स्तथा॥ शंकुस्तेननिखेयस्यात्तस्मात्तस्य परिग्रहंवि॰ शंकुप्रकरणसमाप्तः॥ निश्चलीकृत्यहंतव्यंरहित्वाल्लोहमुद्गरं॥ अष्टधाचस्वयंहन्यात्स्व प्रशस्तंकृततोलब्धीनि॥ वक्ष्यमाणचतुरस्त्रादीनांरज्जुसाध्यत्वात्तदुपयोगि तयारज्जुलक्षणमाह॥ न्यूनानतथाधिकाप्रभवती॰ यासंलक्ष्यमाणावासलक्षणारामशक्रकृशाकुशाभईवेणुकृतावाश्चजीवहासुंजरघुणोक्तवांगुलिरिक्तस्थूलोक्तमानाधिक रज्जुः पा शयुक्तान्विताभिगदिताधाबालतत्कोकृता॥ अथाचतुरस्त्रादिसाधनार्थंअलक्ष्यमाणसंज्ञोचंत्रप्राप्तोति तथाविहितप्रमाणा धिका नभवतिताद्दशीअजीर्णअरक्षरोमरहिताअकर्कशाकुशाकृतावेणुत्वचूलावाश्चज्जारज्जुतणविशेषकृतावासुंजमिश्रि ताशणसंपादिताधाकेशनिश्रितकायासिसूत्रसंपादिताश॥ यश्चतुरस्त्रस्थूलमंडपादितत्कोपियोग्यमानाधिकाभांतद्वयेपि पाशद्वयान्वितारज्जुश्रुच्चकारादिभिरुक्ता॥ तथाचश्रुच्चं॥ अजीर्णग्रंथिनीसूक्ष्मासमाश्लक्ष्णात्वरोमशा॥ रज्जुर्मानाधिका कार्याआध्वरेयोगमिच्छता॥ शणीवाश्चजीचैवबेणवीवाविधीयते॥ रज्जुरुभयतः पाशान्विकृतायज्ञकर्मणि॥ रज्जुर्मुंजिमयी कार्याशनैरज्जुपरिमिश्रितः॥ कालायनोवदत्येवंतथाकुशवल्वजैरिति॥ जीर्णयाभंगः ग्रंथिलक्षितिवर्जितंस्थोल्येमानध्यभिचारः कर्कशेधारणशक्तिः रोमशेस्खलितदेखास्थोल्यं हीनेमानाभावः कार्पासिपट्टजेअधिक्यं॥ महाकः त्रे॰ मोजकोसेयकार्पासंश्रा णिबालजमेवच॥ चतुर्थपरीणाहंरज्जुंशंकोतुवेष्टयेदिति॥ ॥वक्ष्यमाणकुंडमंडपादावुपयोगितयांगुलादिलक्षणमाह॥ अंगुलंत्रिविधंत्वत्र प्रोक्तमात्रा॥ दृष्टेरतः॥ मात्रांगुलंतथामुख्यंगुलंदेहजमेवच ॥८॥ स्पष्टार्थमेतत्॥ ॥मा त्रांगुलस्वरूपंतद्देहांश्राह॥ ॥मध्यांगुलेनैर्ध्यमपर्वदैर्घ्यमानंतुमात्रांगुलमुत्तमंस्यात्॥ पादोनमेतत्कथितंचम

ध्यमंपर्वदैर्घ्यमानंत्वधमंतुतत्स्मृतं॥९॥ होमादिकर्तुर्यजमानदक्षिणहस्तस्यमध्यांगुलेर्मध्यपर्वणः॥यद्दैर्घ्यमानंतदुत्तमं मात्रांगुलंस्यात्॥ एतच्चतुर्यांशरहितंसन्मध्यमंएतत्पर्वदैर्घ्यमानंसदधमंस्यात्तत्फलार्थः॥ ॥मुष्टयंगुललक्षणमाह॥ ॥ आचार्यहस्तस्यकनिष्टिकाद्यैश्चतुर्भिरंगुष्ठविवर्जितैर्यः॥ बद्धस्यमुष्टेस्तुतुरीयभागो मुष्टयंगुलंप्रोक्तमिहाभिमुख्यैः॥ १०॥ कुंडमंडपादावभियुक्तैः पंचरात्रायागमकर्तृभिःकर्माचरणशीलयजमानस्तस्यांगुष्टरहितैश्चतुर्भिःकनिष्टिकादिभिरंगुलैर्बद्धस्य गुष्ठस्यश्चतुर्थोभागस्तन्मुष्टयंगुलंप्रोक्तमित्यर्थः॥ ॥देहलब्धांगुललक्षणमाह॥ ॥समस्थितेनाग्रपदोच्छ्रिताबाहौपुंसःशूद्रवैश्यौ दशमोविभागः॥ तद्द्वादशांशःकतिसक्तुमुख्यैः प्रोक्तंतथादेहजमंगुलंतु॥११॥समलोपादौकृत्वाभुविस्थितेपादाग्रमात्रंभुवि स्थाप्यस्थितेबोच्छ्रिताबाहौयजमानउरुपेसतियोदशमोविभागः परस्परतस्ययोद्वादशोभागस्तत्परिमाणंकाश्यनाहिभिः देहलब्धमंगुलमुक्तमित्यर्थः॥कास्यनः॥ यजमानेनोर्द्ध्वबाहुनाप्रपदोच्छ्रितेनसमस्थितेनयेति॥ तथा॥ पंचारत्निःपुरुषो दशपदोद्वादशांगुलपरमिति॥ ॥कुत्रकिमंगुलंग्राह्यमित्यत्रयांगुलयोगमाह॥ ॥प्रासादेमंडपेचैवमात्रांगुलमुदीरितं मात्रांगुलादित्रयंकुंडेग्राह्यंयथामतिः॥१२॥ यथामतीत्यनेनबहूक्त्याहोमान्यसारेणमहत्परिमाणकमल्पपरिमणकंवायत्र यथोपयुज्यतेतत्रतथाग्राह्यमित्यर्थं स्पष्टमन्यत्॥सिद्धांतसेखरे॥ मात्रांगुलेनहस्तः स्यात्कुंडमानेशिवेरितइति॥पंचरात्रे होमांगा नि स्तुवादीनिथकुंडमुष्टयंगुलाश्रयं॥ देहलब्धांगुलेनापिकुंडादीनिप्रकल्पयेत्इति॥ ॥यवादिपरिभाषामाह॥ ॥यवोयूका चलीक्षाचबालाग्रंरथरेणुकः॥त्रसरेणुः परमाणुरंगुष्टाष्टमांशकाः॥१३॥ अंगुलाष्टमांशोयवः॰ यवोष्टमांशोयूका॰ यूकाष्टमां शोलीक्षाः लीक्षाष्टमांशोबालाग्रं॰ बालाग्राष्टमांशोरथरेणुः रथरेण्वष्टमांशोशस्त्रसरेणुः त्रसरेण्वष्टमांशःपरमाणुरित्येवंअंगुलाष्टमांशावयवोमानार्थंकल्पिताइत्यर्थः॥ ॥अथहस्तादिलक्षणमाह॥ ॥निजांगुलैर्हस्तइहप्रदिष्टोरत्निःकलांशोनिजहस्तएव॥ यस्त्वंशहीनस्तुसएवरत्निः तुष्टिश्चपूर्वैर्भिहितोमहद्भिः॥१४॥ इहमंडपादिकार्येषुएतन्मैर्महद्भिःश्चतुर्विंशतिभिः

पूर्वोक्तैः स्त्रिविधैः रंगुलैर्मानार्थं हस्त उक्तः हस्तएव स्वशोऽशांशैर्नोनः अरत्निरिक्तकः सएवहस्तः स्याष्टमांशरहितोरत्निशब्देन चोक्त इत्यर्थः॥ १३ ॥ ॥इदानीं रामराजपेयीकारमतेन हेलब्ध्यंगुलं प्रतिपूर्वपक्षमाह॥ ॥अथापरोऽश्रुति मूलकल्पे कात्यायनोक्तंखलु हेलब्धं॥ अनन्तरंवाश्रयणीयमत्रनकल्पबाधागमबोधितंन॥ १४॥कात्यायनेनकल्पसूत्रेहेलब्ध्यंगुलमेवोक्तं कल्पसूत्रस्यच मूलश्रुतिः प्रसक्तैवोपलभ्यतेतथाचानुमितमूलकपंचरात्रागमापेक्षयाप्रसक्तश्रुतिमूलकंकल्पसूत्रस्याधिकप्रामाण्यात्कल्पसूत्रेणपंचरात्रागमोबोध्यतइतिकल्पसूत्रोक्तं हेलब्ध्यंगुलमेवग्राह्यं ननुसूत्रबाध्यपंचरात्रागमबोधितंमात्रांगुलंमुख्यंगुलंचेतिचेन्नैवंवक्तुमुचितंमिलत्यर्थः॥ १४॥ बाध्यबाधकताहिविरोधेसोत्रनास्तिविषयस्यभेदतः॥ अन्यथातुश्रुतिरेवबाधिकेयंमयेवमेवनकर्यंत्वयोच्यते॥ १५॥ बाधकस्यचपरस्परंविरोधिविषयत्वेसत्येवबाध्यबाधकभावोदृश्यतेअत्रतुकल्पसूत्रोक्तमानस्यचयनादिकर्मविषयत्वात् पंचरात्रागमोक्तस्यदीक्षादिमूर्त्यादिकर्मविषयत्वाद्भिन्नविषयत्वेनविरोधिविषयत्वाभावेनकल्पसूत्रपर्यंतानुधावनअन्यथाश्रुतेरेवसाक्षादागमबाधकत्वसंभवेतदुपष्टब्धकल्पसूत्रपर्यंतानुधावनस्यवैय्यर्थ्यप्रसंगादित्यर्थः॥ १५॥ ॥त्वदुक्तपक्षस्य पुरातनकल्पतरुकारादिभिरनादृतत्वादपिनत्वदुक्तपक्षोग्रहीतुमुचितइत्याह॥ कल्पद्रुहेमाद्रिमुखैः पुरातनैर्नयंहिपक्षोबहुभिः समाश्रितः समाश्रितश्चास्यमुदीरितोतोग्राह्यंसएवेत्यभाणि युक्तं १६ मंडपकुंडसाध्यकर्मोपदेशकल्पनिकल्पतरुहेमाद्रिमदनरत्नसिंहप्रदीपनारायणकारादिभिः तदुक्तपक्षस्यापरिग्रहादस्मदुक्तस्यस्वपरिग्रहादस्मदुक्त एवग्रहीतुंयोग्यमित्येवंयुक्तमेवभातीत्यर्थः॥ ॥प्राचीसाधनोपयोगितयाशंकुनिवेशनंतद्युक्तोपायंचाह॥ भूमेःशंकोर्विपादोच्छ्रितिमितिगुणतः साधयेत्सुश्लक्ष्णमध्येसंस्थापयेत्तंदृढमुतनिखनेत्सुन्दरेणाष्टधारं कृत्वाकीलेश्रुतुर्भिर्दिशिदिशिविधृतेसांघ्रितुंगत्वमानैरेकीकृताग्रभागेभवतिरजुरतिस्पष्टमूर्ध्वनिरंसः १७ भूमीमारभ्यचतुर्थांशरहितं यच्छंकुत्वंतत्परिमितसूत्रेणशोभनंमंडलं प्राक्वत्तत्समध्येसमतलंशंकुंस्थापयेत्अथवाधोभागेविस्तृतमत्पक्षे-

नुकरेष्टांशाष्टधारंशंकुंकृत्वाभूमोदृढंसंरोपयेत्॥ ततःश्रुतुर्दिक्विधृतैःशंकुतुंगत्वचतुर्थांशाधिकमानेमिलिताग्रभागोश्रुतुर्भिःकीलैःसमतयास्पष्टमूर्ध्वशंकुरत्नंतसरलोभवतीत्यर्थः शंकुर्नानररत्नेतिभास्करोक्तेः॥ कीलानांशंकूसपादहस्तेप्रमाणंनरामरेणेष्टाहोरित्यादिनाप्रदर्शितमिति नेहलिख्यतेविस्तरभियाच॥ ॥अथस्थूलमार्गेणप्राचीसाधनमाह॥ शंकुसंमितगुणाद्दिनाद्भतेमंडलेरवरसवह्नि ३६० विहृते॥ शंकुभाविशतियत्रवारणासापगच्छतियतोहरिदिक्सा॥ १८॥ भूतलमारभ्यशंकुमनापरिमितगुणेनकर्कटेनथामंडलेहतेषष्टाधिकशतत्रयभागैः सर्वत्रसमतयाचिह्नितेयत्रपूर्वाह्णेशंकुछायाप्रविशतितत्रचिह्नंकृत्वाअपराह्णेयत्रबहिर्निर्गच्छतितत्राणिचिह्नंकृत्वोभयेश्चिह्नयोरुपरिसूत्रेदत्तेप्राक्प्रतीच्योर्भवतइत्यर्थः॥ ॥तथाचश्रुत्यं॥ ॥समेशंकुंनिखायशंकुसंमितयारज्ज्वामंडलंपरिलिख्य यत्रलेखयोः शंकुच्छायाप्रविशतिसाप्राची॥ ॥तथाहयशीर्षे॥ ॥भूमितोयसमांकृत्वादर्पणोदरसन्निभां॥ द्वादशांगुलमानेनतत्रवृत्तंतुसंलिखेत्॥ मध्येतुनिश्चलंशंकुंस्थाप्यच्छायांनिरीक्षयेत्॥ यत्रेषातुयाबाह्येशंकुच्छायाप्रकाश्यिता प्रवेशेनिर्गमेतस्यांशंकुच्छायांप्रसाध्यच॥ शंकुच्छायायाश्चिन्हाभ्यांप्राक्प्रतीच्यौप्रसाधयेदिति॥ ॥सिद्धांतशिरोमणावपि॥ ॥वृत्तेभुसुसमीहितेक्षितितलेकेंद्रंरथशंकोःकमाज्ज्यायंयत्रविशत्यपेतिचयतस्तत्रापरेस्योदिशोइति चिन्हकरणंतुनक्षमाणसूत्रकृतोपियोगितयोक्तं॥ १८॥ ॥सूक्ष्मतानयनार्थमाह॥ ॥कृत्वानिर्गमलक्षणंपरदिनेच्छायाप्रवेशक्षणाद्यावन्निर्गमंमितंतत्कालघटिकास्तासितयोरंकयोः हृत्वामध्यलवान्विभज्यखरसैरासांशतः प्राग्गुणोनितःस्याद्धरिदिक्कुटायनदिशंरामोदितोयंविधिः १९ द्वितीयदिनेपिपुनर्निर्गमचिन्हंकृत्वाछायाप्रवेशक्षणमारभ्ययावच्छायानिर्गमोभवतितन्मध्यनाडीकालनाडिकाभिर्यंत्रादिनाज्ञातासिद्धान्तानुसूर्यापरदिनापगमचिन्हद्वयमद्गतानूनागानूसंगुण्यषष्ट्याविभज्यासभागैः प्राच्यामेवायनदिशंप्रतिनीतंसूत्रंसूक्ष्मंप्राचीभवतिह्ययंरामोक्तप्रकारइति अत्रस्थूलंत्रैराशिकंअहोरात्रसंजातापगमचिन्हाद्ध्यांप्रल

रक्षागात्मकचलनदलनिनंतरंयादृष्टिनाडिकाभिः सूर्यस्यायनवशादेतावच्चलनंतदाप्रवेशनिर्गमांतरालघटीभिः कियद्दिसाकांक्षाजा
ते॥ तत्रअर्धंतयोः स्थिरांशावभिन्नजाति प्रमाणमिछाच॥ मध्येभिन्नजाति फलंतद्दंसगुणमादिनाविभजेदितिवचनाद्दगमचिं
न्हद्वयांतरालभागात्मकेफलेमध्यास्थापितेतन्स्थानेस्थापितेछात्मकांतरालघटिभिर्गुणिते अधस्थानस्थापितषष्टिनाडीकाल
कप्रभागेनविभक्तेयल्लब्धंचादितायावन्मात्रमेवचलनमितिज्ञातव्यं॥१९॥ ॥सिद्धांतसिरोमण्युक्तप्रकारेणप्राचीसाधनमाह
एकस्यान्तरभाग्रतोभुजमितांदत्वाशलाकामथोशंकोः कोटिमितांतथैवचयथास्याद्दयोः संयुजि॥ कोटिः प्रागपरायतेदितिभा
तेसैवस्फुटेः प्राचीभवेदितिभास्करार्यगणितंसिद्धांतशीर्ष्णिमणौ॥२०॥ शंकुछायायाः प्रवेशेनिर्गमेनाजातेयत्रचिन्हंकृत्वा
तदारभ्यभुजपरिमितांसरलांशलाकांयथादिशंदत्वाकोटिपरिमितांद्वितीयांशलाकांशंकुतलमारभ्यतथादद्याद्यथोभयाग्रयोः सं
योगोभवति॥ एवंसतेसतिनियमेनैवकोटिः पूर्वापरायतेरपतेसैवचसूक्ष्माप्राचीभवेदितिभास्करार्यगणितं॥२०॥ ॥भुजको
ट्योरज्ञानेतद्दृष्टयज्ञानोपायमाह॥ ॥केंद्रस्थशंकोः छायाग्रप्राचीसूत्रांतरंभुजः कोटिर्भुजप्रसाधनवर्गद्दयानंतरपदंभवेत् वृत्तम
ध्यस्थानात्मकेकेंद्रेस्थापितस्यशंकोः छायाग्रचिन्हस्यस्थूलमार्गेणदत्तस्यप्राचीसूत्रस्ययदंतरंपरिमाणंसएवभुजः भुजशंकुछा
ययोः छातिद्दयस्ययदंतरंविवरतस्यमूलंकोटीरितिअर्थः॥२१॥ ॥युगपद्दिक्चतुष्टयसाधनोपायमाह॥ ॥दत्वाभुजंद्विगुणमंग
लरेखिकाभिसंचालयेत्समतयानरमूलयोगः॥ यावद्भवेदितिहते यमसोमकाष्ठेस्यातांस्फुटेशंकतोवरणेंद्रकाष्ठे॥ पूर्वेदत्तंभुजंद्विगु
णंकृत्वातस्मिन्नेवस्थानेदक्षिणोदग्गायतंस्थापयित्वाभुजमारभ्यशंकुमूलपर्यंतं अंगुलमात्रेसमतयारेखाःकृत्वातासिरेखाभिः
भुजंसमतयायावत्संकुमूलेनमोगोभवेत्॥ तावत्पर्यंतंचालयेत्॥ एवंशंकोश्चालितेभुजएवदक्षिणोत्तरेदिग्भागेजायते मत्स्यद्दयो
न्यादननेनमत्स्यद्दयस्यमध्यदत्तसूत्रेणपूर्वपश्चिमकाष्ठेस्यातामित्यर्थः॥२२॥ ॥सूक्ष्मभुजानयनपूर्वकंयुगपद्दिक्चतुष्ट
यसाधनोपायमाह॥ ॥श्लोकद्दयेन॥ ॥यद्दभुजंप्रथमतोयथेलाघवोक्तंमानीयशंकुरुचिनानगुणोस्यवृत्तेः भाग्यासदायगु
णतुल्लतसुकेंद्रादद्याद्गुणंचभुजमध्यरुतांकलग्नं॥२३॥ एवंसतेभुजएवातुयाम्यसोम्येकेंद्रशंकुः स्फुटतरेवरणेंद्रकाष्ठे॥
स्यातांतदानतनएवसदृश्ययःस्वाद्देवंस्फुटायसुसकलाहरितोभवंती॥२४॥ अथयद्दलाघवोक्तंभुजंगणनयाआनीयआनीतंभु
जेशंकुछायापरिमितसूत्ररूपाव्यासार्द्धेनिष्पादितेमंडलेशंकुछायायात् मथोदितदिगग्रंसंपूर्णज्यावत् मूलाग्रयोर्मंडलंपरि
धिलग्नंदत्वाशंकुमूलभाग्यभुजमध्यसंपादितचिन्हलग्नं सूत्रंदद्यात्॥ एवंभुजसूत्रप्रसारणेसतेभुजएवदक्षिणोत्तरदिशोभव
तः शंकुमूलाद्भुजमध्यपर्यंतंप्रसारितसूत्रमेवस्फुटतरेपश्चिमपूर्वदिशोभवत् इसेनप्रयत्नेनसर्वादिशः। अन्यत्रिचारिण्यः प्रगता
भवंतीत्यर्थः॥ ॥तदुक्तंग्रहलाघवे॥ ॥अर्कसंक्रांतिलवाक्षकर्षनिहतिर्भाकर्णनिघ्नीनभोस्थोन्यया ३५० सारविहिभुजोयम
दिशद्दिग्भाक्षभासंस्कृतः॥ केंद्रेभोत्यचलोसपूर्णगुणवद्भायाग्रहेयोभवेद्याम्योदक्सभुजाद्दकेंद्रनिहतारज्जुस्तु पूर्वापरा॥ अस्या
र्थः॥ ॥अर्कक्रांतिलवाक्षमाणाः मेषसंक्रांतेसकाशात् अयनांशतुल्यदिनैः प्राक्मध्यान्हेयाद्वादशांगुलछायासाअक्षभासंज्ञा
पलभेत्युच्यते तस्याअक्षभायाः योवर्गस्तस्यद्वादशवर्गयुक्तस्ययत्सदृसअक्षकर्णः अर्कक्रांतिलवानांलक्षणकर्णस्यचयानिहतिः
एकेनअपरगुणनंसानिहतिः भाकर्णनिघ्नीभाकर्णगुणिता अनंतरंनभोस्थान्यया ३५० सापंचाशदधिकशतत्रयभक्तासतीयद्ल
ब्धंतत्परिमाणरविदिक्फलंयादिक्सेवदिक् यस्यैवंसतःभुजोभवति सचभुजः पश्चिमदिशद्दिग्भाक्षभासंस्कृतः कर्तव्यः यमदिशा
दक्षिणयाद्दिगुणिताक्षभातथासंस्कार्यः संस्कारश्चैकदिक्के योगोभिन्नदिक्के तरं तत्राक्षभानित्यंदक्षिणा योगेभुजदिग्यथास्थिता
अंतरेतु यदवशिष्यते तद्दिगेवभुजदिक् एवंभुजेसाधितेदिक्ज्ञानमात्र॥ केंद्रेदत्तमध्येभोत्यचलोशंकुछायापरिमितव्यासार्द्धेन
सतेसभुजोयथादिशंछायाग्रात् पूर्वगुणवत् संपूर्णज्यावत् प्रदेयः एवंसतेसभुजएवयाम्योदक्भवति भुजार्धकेंद्रनिहतारज्जु
स्तुभुजाद्दगिकेंद्रपर्यंतंस्थापितरज्जुः पूर्वापरादिग्भवति॥ क्रांत्यंशज्ञापनार्थंउपायोपियद्दलाघवएवोक्तः॥ स्फुटंउदानिरबधाद्दो
योः ४० वरद्दताः ४० शैलाग्नयो ३७ ध्यग्नयः ३४ स्त्रिंशत्तत्व २५ धृती १८ नयारिनिधयः यसायनांशयहात्॥ चाद्दंशाभक्तु १०

भागसंख्यकयुतिशेषेष्यघातादृशासाढ्यादिग्विरहिताः क्रवादिरपसरत्सदिग्गोलाद्भवेत् ॥ ॥अस्यार्थः॥ १ चत्वारिंशत्प्र
हतीनिचयखंडानिस्युस्तैः खंडैः हृतात्सायनांशग्रहात् क्रवादिः अंशादिः अधमः क्रांतिर्भवेत् ॥ शकः अस्तु अत्र चत्वारिंश दधिकचतु
श्शतात्मकः ४४४ अयं षष्टिघ्नः क्रांत्यंशानां भवति तद्युक्तोयोग्रहोराश्यादिः॥ अत्रेतोनु ग्रहोराशिः अयनांशयुतः कर्तव्यः तस्मा
दैवैः क्रांतिर्भवेतु तत्प्रकारमाह॥ बाह्वंसेति बाहुर्भुजः तस्मिंयेंशाः तेषु दशभिर्भक्तेषु शेषंस्थाप्यं क्रमोत्क्रमखंडानां युतिः
कर्तव्यः शेषंगुण्यं। अग्रिमखंडेन अनयोर्घातात् गणनयात् दशाप्यादशभिर्लब्ध्या आढ्या युक्ता तदनंतरदिग्विरहिता दशभा
क्तासती क्रांतिर्भवति· तद्विकृतस्याः क्रांतेर्दिक् स्वगोलात् अयनांशयुतग्रहगोलात् ज्ञातव्या। तत्रमेषादिषट्कं सौम्यगोलः अपरं
याम्यगोलः॥२४॥ ॥प्रकारांतरेणउदीचीसाधनस्य पूर्वकं प्राचीसाधनमाह॥ १ मध्यान्हेपरमाक्रांत्यरज्जुतलाद्रेखाग्रभायंगता
स्यात्सौम्याथतदंतरंक्रियदपिस्यात्तदाग्रहयात् प्राक्प्रसृकुशफरोविधायनिपुणंकर्कटिकेनद्वयोर्दोर्घास्त्रमितिरितास्फुट
तरा प्राचिबुधैः सर्वदा २५ मध्यान्हेवारंवारंसावधानतयाल्पच्छायांशंकुछायांशाशंकुतलमारभ्यछायाग्रपर्यंतंनितारे
खाउदीचीभवतीततस्तस्माः रेखायाः मध्यंकिंचिदुल्लंघ्यरेखाग्रहयात् कुशलहस्तधृतेनकर्कटेन पूर्वपश्चिमयोर्मत्स्यद्वयंछ
त्वोभयमत्स्यद्वयोर्मध्येसूत्रंदद्यात् दियंप्राचीसर्वकालंज्योतिर्विद्भिरुक्तेत्यर्थः २६ प्रकारांतरेणोदीचीसाधनपूर्वकंप्राचीसा
धनमाह। दीर्घवंशोदितदंडेसरलसमततमायग्रसंप्रोतकिलेबध्वालंबोसमानोसमभुविविधृतेसौम्यादिग्वक्रपुंसा ध्रुवेदंडे
संलंबेसमसमयदृशा नोन्नितेलंबजांकदृङ्नेरखाविधोरिकृशफरयुक्तवशात्साग्रेदृङ्नितः स्यात् २७ अतिलंबोन्निम्नोन्नत
त्वरहितेसर्वशरीरेवंशशाल्मादिदंडे अग्रभागेप्रवेशितलौहकीलेवंशपार्श्वद्वयेसमानौलंबौबध्वा तादृशेवंशेऽदःमुख
पुरुषेणध्रुवाभिमुखंसमग्रहोधृतेसतिध्रुवेलंबद्वयसहितेदंडेचैकस्मिन्समतीयेएकदृष्ट्या बलोनितेसतिलंबयोरधस्ताच्चे
न्नद्वयंछत्वातदुपरिदत्तारेखासूत्रंवासौमादिगुदीचीभवतः उदीच्याः पूर्वोक्तप्रकारेण प्रागपरमत्स्यद्वयवशात्प्राचीभवतीत्यर्थः

॥ ॥नक्षत्रोपरिप्राचीसाधनमाह॥ ॥पुष्ये पौष्णे वारुणेराक्षसाद्यन्यस्मिन्वासार्द्धहस्तत्रयोच्चे॥ इंद्राशायांवापरस्यामुदग्वद्धृत्वा
च्चीप्रसगशेभवेतां॥२८॥ पुष्यरेवतीशततारकामघानामन्यतमेक्षतिकादौअन्यस्मिन्वासार्द्धहस्तत्रयोच्चेउदयकाले उस्तमयका
लेवासतिउदयकालेप्राच्यांउस्तमयकालेप्रतीच्यांउदयस्साधनवद्वंशेननक्षत्रंवेधात्प्राचीप्रतीच्योभवेतामित्यर्थः॥ २९॥ एवंप्राची
प्रतीच्योःसाधयित्वा दक्षिणोदीच्योः साधनार्थमाह॥ स्वेष्टक्षेत्रगुणेजिनांशदशकं संवर्ध्य पाशद्वयं क्षिप्त्वाप्राच्यगुणांतहस्तनरयोःक्षिप्त्वा
धःसंकर्षणे। क्षिप्त्वाधुदग्रोगशयोस्तमयतोर्दत्त्वाचशंकुतयोर्दोर्ज्जुरितीरितेबुधनरैर्याम्योत्तरेद्वेदिशे॥ ३०॥ हस्तादिष्टक्षेत्र
मध्यसूत्रेचतुर्विंशतिधाविभाजितेतस्मिन्सूत्रेचतुर्विंशंशदशकं संबध्यपाशद्वयं क्षिप्त्वातोपाशेप्राचीसूत्राभयप्रांतरोपितयोःशंकोः
शंकोः प्रक्षिप्यदक्षिणोत्तरयोः दिशोः क्रमेणसूत्रमध्यक्षतमध्यचिन्हाकर्षणेक्षतोन्नमत्रशंकुद्वयंसंरोप्योभयशंकोःसूत्रंदद्यात्तेन
प्रकारेण बुधवरैः याम्योत्तराशेउभेअभ्युक्ते इत्यर्थः॥ ॥चतुरस्रसाधनप्रकारमाह॥ ॥प्राक्सूत्रंजिनभाजितंहलवैसूत्रंविधा
यांततः शिष्टेनोभयतः क्षतोशंकरकोनितोगुणः सौम्यदिक्॥ व्यासार्द्धेनदिगंकतोविधुदलैः संज्ञानमत्स्यांतरात्तैर्वेदियुणैर्भवेत्समग्रं
क्षेत्रंचतुष्कोणकं॥ ३१॥ इष्टहस्तादिक्षेत्रपरिमितंप्राचीसूत्रंचतुर्विंशतिभागंकृत्वा तत्सप्तभागैः न्यूनंकृत्वा ऊर्वरितसूत्रेण प्राचिसूत्रो
भयांतात् तत्सार्द्धद्वयेमत्स्यद्वयंपूर्वकृत्वोभयमत्स्ययोर्मध्येरंतसूत्रं उत्तरदिक्प्रभवति तदनंतरंप्राचीसूत्रार्द्धमानेनादिक्चतुष्टयचिन्हेभ्यः
क्रमेणक्षतैरर्धचंद्रैर्निष्पन्नमत्स्यचतुष्टयंमध्येशंकुनिखननेनसूत्रचतुष्टयेदत्ते तुल्यभुजचतुःकोणक्षेत्रंभवतीत्यर्थः॥ ॥अथसि
द्धांतसंस्थरे॥ ॥सोमसूत्रप्रसिध्यर्थंसूत्राग्रभ्रमणंततः प्रागंकेप्रसंगेकंचहस्तंदत्वासमाचरेत् उदग्दक्षिणगोमत्स्योल्लेखायाजातेक
मात्॥ शफरस्यमुखेपुच्छे मध्येचिन्हेप्रसारितं समंतात्सोमसूत्रंस्यादिति॥ तथा॥ क्षेत्राद्दिमानपुच्छेनदिक्चिन्हंसमालिखेत्
दिक्चिन्हंसमाश्रित्यकोणेष्वंकान्समालिखेत्॥ क्षेत्राद्दिमानसूत्रेणप्रतिलोमानुलोमइति॥ ३१॥अधममध्यमोत्तमभेदेन
मंडपानाह॥ यस्य दश रविहस्तामंडपास्युः कनिष्ठारविमनुनृपहस्ता मध्यमास्ते प्रदिष्टाः॥ नृपधृतिनरचूडारत्नयश्चोत्तमा

स्तेसमसमचतुरस्राःसर्वएतेभवंति ३२ वसवोष्टौमनवश्चतुर्दशनृपाःशोऽशधृतिरष्टादशाद्यास्त्रयोविंशतिः सभाअव
काश्चतेसमचतुरस्राःसमानभुजःश्चतुःकोणाश्चतस्पष्टं एषांक्रमात्क्षेत्रफलं चतुषष्टिहस्ताः ६४ हस्तशतं १०० श्चतुश्चत्वा
रिंशच्छतं १४४ चतुरुत्तरेद्वेशते १५६ षट्पंचाशदधिकंशतद्वये २५६ चतुर्विंशत्यधिकंशतत्रयं ३२४ चतुःशती ४०० षट्सस
प्तत्यधिकापंचशती ५७६ चेती अधममध्यमभावस्यापेक्षित्वात्तत्साक्ये पिनदोषः ॥ ॥उक्तंचपंचरात्रे॥ कनीयान्दशह
स्तस्यान्मध्यमोद्वादशोन्मितः तथा षोऽशभिर्हस्तैर्मंडपस्यादिहोत्तमः इति महाक्रमे॰ हस्तानुद्वादशाद्यैश्चक्रमाद्वौद्वौप्रवर्द्धयेति
॥ प्रतिष्ठासारसंग्रहे॥ ॥रवन्योद्वादशहस्तोयंद्विद्विर्वृद्ध्यातंतः क्रमात् सिद्धांतशेखरे मंडपोर्कक्रोपिवा कर्तव्यामंडपाश्चान्ये
द्विद्विहस्तप्रवृद्धितइति सोमशंभुनापि मंडपोर्कक्रोथवा द्विहस्तोत्तरयावृध्याशेषास्युमंडपाः सुप्राइति॰ अन्यत्रापि॰ गृहस्येशा
नभागेतु मंडपंकारयेद्बुधः द्वादशैरष्टषट्हस्तैः षोऽशैर्वासमंततइति एतेनद्वादशचतुर्दशषोऽशहस्तानांक्रमेणाधममध्यमोत्तमत्वमु
क्तं अन्येये अष्टषोऽशविंशांतंमंडपंचाधमादिक्रमेणेति हयत्रे॰ दशाष्टहस्तहीनंतुमानसेनदुरितं मध्यममानमिसाहुर्हस्तषोऽशकं
तथा चतुर्विंशतिहस्तंवा हस्तविंशतिकंतथेती एतेनाष्टहस्तदशहस्तयोरधमत्वंद्वादशचतुर्दशहस्तयोर्मध्यत्वंविंशतिचतुर्विंशतिहस्त
योरुत्तमत्वं सुक्तंअयंचमंडपः प्रामाणाच्चतुरस्रभादेशादन्यदितिवंचनाच्चतुरस्रः कर्तव्यः सिद्धांतशेखरे चतुरस्रचतुर्द्वारोमंड
पोर्कक्रोपिवेति ३० मंडपस्तंभप्रकृतिभूतवृक्षान् बाह्यस्तंभपरिमाणसंख्यांचाह स्तंभानुसारमखदारुभवाः प्रशस्तावेणू
कृताः क्रमुकजातजबोद्भवाश्च अन्येप्यनिंदिततरुप्रभवासमानास्युः पंचहस्तादिमिताः रविसंख्यकाश्च ३१ खदिरमधुकजंबूनिंब
सारयक्षियवस्तघटितावंशसंपादितावा वृंगफलवस्तसंपादितावा एतेषांमभावेऽनिषिद्धशालादिवृक्षजावाचक्राःछिद्ररहि
ताःस्थौल्यकार्श्यरहितास्तंभाः कार्याःतेषांमध्येबाह्यद्वादशस्तंभाः पंचहस्तप्रमाणाः कार्याः इत्यर्थः तदुक्तंपंत्रे॰सारदारुमयस्तंभा
ह्यदान्कुर्याद्दशून्समानिति॥ किमासारेविशेषः यत्तीयवृक्षोवेणुर्वाकिमुक्तः स्तंभकर्मणी अन्योचिशुद्धसाराभवेद्यूनन्यिभ्र

रुहाःनानिषिद्धशूरुहाःतानेवाह दृढशल्यस्त्वयंशुष्कःकुटिलश्चपुरातनः॥असौम्यभूमिजनितःसंत्याज्यस्तंभकर्मणी॥ शारदातिल
के॥ ॥संस्थाप्यद्वादशाभितः पंचहस्तप्रमाणास्तेनिच्छिद्राःजबशुभाइति॥ वेदिकोणस्तंभपरिमाणमाह॥वेदिकोणाहिताःयुगसंख्यां
श्रेष्ठमंडपदलप्रमितोच्चाः॥श्रेष्ठएवतुकनिष्ठमध्यमयोरष्टहस्तविमिताः सचूडकाः॥३२॥वेदिकोणेषुरोपणीयत्वेनोक्ता येचत्वारःस्तं
भास्तेसर्वस्मिन्नपिउत्तमेमंडपेनतदुत्तममंडपविस्तारार्द्धप्रमाणोच्चाःसिरायुक्ताएवकर्तव्याः अधममध्यममंडपयोस्तुसर्वप्रकार
योः अष्टहस्तप्रमाणएवेत्यर्थः॥ ॥यच्छारदातिलके॥ ॥षोऽशस्तंभसंयुक्तंचत्वारास्तेषुमध्यमाः॥अष्टहस्तसमुच्छ्रायाइति॥३२॥
मंडपेस्तंभनिवेशवननप्रकारमाह॥भूमिंमंडपमध्यगांनयलबांकृत्वाचतुर्भिर्गुणैःशरभ्याग्निदिशंखनेन्निरिवलक्रोष्टास्तेषुगर्त
न्यहि॥स्तंभास्तांशमितांस्तथैवचतुर्षुमध्येष्वगर्थक्रमात्स्तंभान्षोऽशरोपयेदृढतरंभागुत्क्रमानात्सुधः॥३३॥ प्राग्वक्रचतुरस्रप्रकारेणो
क्तंमंडपान्यतममंडपप्रमाणंस्थलंचतुरस्रंकृत्वामंडपप्रमाणांरज्जुंचतुर्गुणांकृत्वातथाविधांपुनस्त्रीगुणांकृत्वाद्वादशस्वग्रेषुगैरिकादि
भिर्लांछनानिकृत्वाचत्वारिचिन्हायथाकोणेषुपतितथातांप्रसार्यकोणांतरालचिन्हेषुभागपरेद्वेद्वेसूत्रेदत्वामंडपभुवि
नवकोष्टायोजातायां॥आग्नेय्यांदिशंभागंत्यक्त्वाबाह्यकोष्ठकोणेषुस्तंभपंचमांशहीघनिवेशन्कृत्वा तेनैवक्रमेणाभ्यंतरकोणचतुष्टयेचतान्
कृत्वागर्तखननक्रमेणउक्तप्रमाणान् षोऽशोपिस्तंभास्तंभपंचमांशेनातिदृढरोपयेदिति॥ तदुक्तंपंत्रे॥वेदिकोणेषुविनस्येत्स्तंभान्वे
दस्वरूपकान्॥ आग्नेयादिक्रमेणैवेतिउपलक्षणमेतत्॥ बाह्यस्तंभनिवेशनमप्याग्नेयादिक्रमेणैवेतिद्रष्टव्यं॥ तदुक्तं॥ स्तंभोच्छ्रायेशिला
न्यासेरुत्सेधयोजनकीलके॥खननावटसंस्कारप्रारंभोवह्निगोचरइति पत्रे॰ मंडपार्द्धोच्छ्रितान्वेदसंख्यांश्चूडान्वितांस्तथा॥स्तंभांस्त्र
यंचसंस्थाप्यस्तंभद्वादशकंपुनः॥बाह्येषुक्रमप्रमाणेनतत्रतत्रविभागतःइति॥ ॥शारदातिलकेस्तंभात्कृत्वातत्संचमांशंनिखनेदि
त्योहतंत्रवित्तमइतिवारत्नशास्त्रे॥ ॥पंचमांशन्यसेद्भूमौसर्वसाधारणोविधिरिति ३३ स्तंभोपरिकाष्टानिवेशनमाह दृचाका
ष्टचतुष्टयंसममितिप्रांतद्वयच्छिद्रवन्मध्यस्तंभशिरवासुतीर्यगपरंस्तंभेषुचान्येष्वपि त्रीणित्रीणिदिशंदिशंप्रतितथाकाष्टानिकर्णा

दिनाकोणाद्दोचतथापराणिशिरवराकारंचमध्येचरे॥ ३४॥समप्रमाणअंतद्वयेरंध्रप्रवेशनयोग्यछिद्रयुक्तंकाष्टचतुष्टयंमध्यरंध्रंचचतुष्टय
चूडासुप्रागपरायतंदक्षिणोत्तरायतंचबिलप्रवेशननिवेश्यचाद्येष्वपिद्वारशस्तंभेषु एकैकदिशिद्विणीत्रिणीकाष्टानिकर्णा दिनाचूडासु
बिलप्रवेशेन वातीयकृनिवेश्यकोणद्वयेएकैकमितिविदिक्षुचत्वारिकाष्टानिनिवेश्य वेदीसमंततः मध्येपन्यानिकाष्टानिनिवेश्यवे
दुपरिकाष्टचतुष्टयारंभेषुकलशाद्रातिकाष्टनिवेशनेनप्रासादादिशिरवराकारंकुर्यादित्यर्थः॥ ३४॥ ॥मंडपद्वारान्याह॥ कनिष्टमध्यो
त्तममंडपेषु द्वाराणिचत्वारिदिगंतराणि॥ गजाग्निनेत्रेशरेरंगुलथांगबाणे क्रमादंगुलकैर्भवंति॥ ३५॥ अधममध्यमोत्तममंडपेषु
प्रतिदिक्स्थमुभयपार्श्वयोः पंचमांशेनशाखानिखननेनचत्वारि द्वाराणिकार्याणि॥तत्राधममंडपेषुचत्वारिंशदंगुलविस्तृतानि
नि मध्यममंडपेद्विपंचाशदंगुलविस्तृतानि॥उत्तमेषट्पंचाशदंगुलाविस्तृतानि तिर्यक्काष्टनिवेशेनेतानिभवंतीत्यर्थः॥ ॥तथा
चमंत्रयुक्तावल्यां॥ ॥दिक्षुद्वाराणिचत्वारिविदध्यात्पंचमांशतरिक्ते पंचत्रे कनीमशिस्याद्विकरंचतुरंगुलवृद्धितः॥मध्यमो
मयोद्वारमितिशिद्धांतसेश्वरे पंचमांशेनैवरचयातंसवेधांचशिवोदितंमितिदैर्ध्यस्यायुक्त्वा दर्यात्परिमाणमितिकाश्यपोक्तो
प्रवेशयोग्यानिकर्तव्यानि॥३५॥ ॥मंडपाच्छादनमाह॥ ॥नारिकेलदलयैःसुपल्लवैःवेणुभिश्शुभकटेरसंभवैः॥द्वारवर्जमभितस्तथो
परिछादयेद्दविलमंडपंबुधः॥ ३६॥नारिकेलपत्रैर्जंबूमधूकादिशोभनपल्लवैर्यातेषामभावेनूतनवेणुभिः कृशैर्निर्मितंकटैर्या
द्वारचतुष्टयंवर्जयित्वासमंततः उपरिचसर्वमपिमंडपंकुशलःआछादयेदित्यर्थः॥ ॥तदुक्तंक्रियासारे॥ ॥नारिकेलदलैर्वापीपल्ल
वैर्यथिवेणुभिः आछाद्यमंडपासर्वेद्वारवर्जंतुसर्वतइति॥हयत्रेः मंडपंमंडपेहाद्दशाखाभिश्चसमंततइति॥वास्तुशास्त्रे॥कटैस्सि
क्तुसंछाद्यचिजयाधास्तुमंडपाः॥ ३६॥प्रसंगान्मंडपोत्पत्तिंकरणमाह द्वाभ्यां सफलसल्लकूपैनारिकेलद्रुमोद्भवैः कनकतरुभवैर्वा
कादलैर्दर्पणैश्चविविधवसनगंधैश्चामरैर्घंटिकाभिर्विविधरचितनानोपहृषयेत्सर्वपूयान्॥ ३७॥चंद्रातपश्चामरैः पद्मकूलै
र्वोप्यस्त्रभिर्दर्पणैर्घंटिकाभिः॥रत्नाद्यैर्नवभिर्यैः सफलैर्भूरिभेदैर्भूषांकुर्यान्मंडपेपल्लवैश्च॥ ३८॥फलपत्रसहितैर्नारिकेल

MEMORIAL

वृक्षस्तंभैरत्राहशैः चूतीफलवृक्षस्तंभैर्वा॥ तादृशैरेवकदलीस्तंभैर्वा आदर्शैश्चश्वेतरक्तनील पित्तादिभिः पट्टकूलकार्यःसवस्त्रवे
ष्टनैश्चामरैर्घंटिकाभिःसाधारा रचितमृन्मयादिभांडोच्छ्रायैः कोउशोपिमंडपस्तंभानलंकुर्यात् तथाचंद्रा॥चिन्हितैर्वितानैः पट्टसूत्र
कृतैश्चमराकारैः गुच्छैःपुष्पमालाभिःसोल्लिकापर्पटिकाभिश्चतादिपक्वैर्फलैरेवारिकादिरवाद्यैः आम्रनारंगादिनानाविधैरुत्तम
फलैश्चूतजंबूडुंबरादिमालाग्रथितैःपल्लवैः स्पष्टमन्यत्॥ तदुक्तंहरत्रे॥ दर्पणैश्चामरैर्घंटैरंतरान्वस्त्रैर्विभूषयेत्॥ कलशैर्घंटिकाभिश्च
साधारैर्ध्वजैरंतथेति॥सिद्धांतशेखरे॥चूतपल्लवमालाद्यैर्वितानैरुपशोभितं॥विचित्रवस्त्रसंछन्नं पट्टकूलविभूषितं सफलैः कद
लीस्तंभैः क्रमुकैर्नारिकेलजैः फलैर्नानाविधैर्भोज्यैर्दर्पणैश्चामरैरपि॥भूषितंमंडपंकुर्यारत्नपुष्पतनुज्वलं॥अन्यथाभावेपंच
रात्रेदोषउक्तः॥ अनुक्तैः साधनैः कृत्यंयदिवाकुटिलाकृतिः॥मानाधिक्योथकान्यूनोमंडपः कर्तृनाशनः आख्यातसाधनैः कृतः॥
सरलदाममानकृत्॥मनोज्ञोमंडपोयोसोकर्मकर्तुश्शुभावहइति॥३८॥ ॥वेदीमाह॥ ॥वेदिमंडपमध्यकोष्ठविमिताहस्तप्रमाणोच्छ्र
यारामाध्यक्षयांकरद्विमितैर्वांशैर्धचेदुन्नतामध्येदर्पणसन्निभासमतलास्त्रास्त्रासुपार्श्वतथापक्वापक्वसमेष्टकाभिरथवाल्ला
क्षेमृदासुंदरा॥३९॥ आयामाविस्तारयोस्ततत् मंडपमध्यकोष्टपरिमाणाहस्तप्रमाणोच्चानिजतृतीयांशचतुर्थांशपंचमांशसप्तमां
शनवमांशैकादशमांशान्यतमेनांशेनचोच्चामध्येआदर्शवत् किंचिदुन्नता॥अथवाचतुःकोणाशोभनयास्त्रीसनोरमापक्वापक्वा
क्वान्यतरास्निग्धोन्नतत्वरहिताभिरिष्टिकाभिस्तदभावेमृदाचवेदिः कार्येत्यर्थः॥ ॥तदुक्तंसिद्धांतसेश्वरे॥ ॥नवांशंमंडपं
कृत्वामध्यांशेवेदिकामतेति॥ ॥वशिष्टसंहितायां हस्तोन्नतांचविस्तीर्णांचतुर्हस्तैः समंततइति॥क्रियासारेपि त्रि
भागंमंडपंकृत्वामध्यभागस्तुवेदिका हस्तमानंतदुच्छ्रायंचतुरस्रंसमंयथा पक्वाग्निचयितपक्वाग्निरिष्टकाभिरिष्टंयथा तथ्या
वेदिकाश्रेष्ठातदभावेमृदापिचा अथवापार्श्वसुस्निग्धादर्पणोदरसन्निभेति अन्यत्रापि ततस्तस्यमध्येबुधस्त्रिभागेक
भागेनवेदिं॥ अरत्निप्रमाणोन्नतादर्पणंतन्निभापार्श्वतनो हारिणीचापिकुर्यादिति अरत्निशब्दोहस्तपर्यायबहुषुस्थलेषु

हस्तरत्निशब्दे प्रयोगात् पंचरात्रेः वेदिमंडपस्य त्रिभागतः चतुर्थांशोच्छ्रितितस्यास्त्रिपंचसप्ततोपिवा नवैकादशभागैरेता
मिष्टकाभिः प्रकल्पयेत् ३९ नतुतुल्यापुरुषादिषुमध्यमकोष्टन्यूनाधिकमानयोर्वेदिकयोरत्वात्तद्विरुद्धं मध्यकोष्टतुल्यपरिमा
णत्वकथनमित्याशंक्यापरिहरन्नकार्यविशेषे वेदिकाविशेषंप्रसंगादाह सामान्योक्तो वेदिकेयंप्रदिष्टावाराहोपपन्निनीपद्मतुल्या
विंशरत्नस्त्रा श्रीधरीस्याद्विवाहे राज्ञांपट्टेस्यात्सुभद्रासभद्रा ४० यत्रपरिमाणविशेषो नोक्तो वेदिमात्र मेवोक्तं तत्रेदंपरिमाणं
नतुसर्वत्रेतिनाविरोधः अरामतडागादिपतिष्ठायांपद्माकारापद्मिनीसंज्ञा वेदिः विवाहेचविंशतिकोणाश्रीधरीनामका राजां
पट्टाभिषेकेचतुर्दिक्षुसर्वतोभद्रयत्रभद्रान्विता सुभद्रासंज्ञेतिसिद्धांतसेखरेपि वेदीचतुर्विधातत्रचतुरस्राचपद्मिनीपद्म
संज्ञिका राज्ञांस्यात्सर्वतोभद्रा चतुर्भद्राभिषेचने विवाहेश्रीधरीवेदीर्विंशत्रसमन्विता हर्षणोहरसंकाशानिम्नोन्नतविवर्जि
ता क्रियासारे वेदिकान्येथासेदोषउक्तः यत्रपाणिनिक्षत्तमध्यास्पर्शादृगशोभना मानहीनाधिकायासा कर्तृकामविनाशनीति ४०
श्लोकत्रयेणतोरणोन्याह।। लक्षोदुंबरबोधिवृक्षनटजाः पूर्वादिदिक्षुक्रमाद्वाघोपांत्यविपर्ययेणगदिताद्यांतवैपर्यतः एवा
मेकतरूद्भवाश्चसकलाःकाम्येशमीजाश्वथाजंबूखदिरतालकान्यतमजास्तेषामभावेशुभाः ४१ निधिशाखजवःसमाहितनवश्रृंगा
न्वितःसत्वचःशारवाः पंचरसाद्विहस्तविमिताःस्वाग्न्यंगुलैः वर्तुला द्वारेभ्योबहिरेवहस्तविमितेदेशेनिरंधोयुधः द्वार्यंचमभागतो
युगलशोहीनादिकेषुक्रमात् ४२ तीर्यग्द्विहस्तपतिकानिहस्तपादार्धविस्तान्यथाभादिकेष्ट प्रांतद्वयछिद्रयुतानिहस्तादैर्घ्यि
र्द्धमानान्यथवाशिरवासु ४३ पिंपर्युदुंबराश्वत्थवटवृक्षजाः अथवाअश्वत्थोदुंबरलक्षवटजाः अथवावटो दुंबराश्वत्थपूक्षजाः
एतेषांचतुर्णांमिश्रावेरणमध्येरुक्रएववृक्षजावातस्याप्यभावेजंबूखादिरेतालानामन्यतमवृक्षजावाछिद्ररहितासरलाः निम्नो
न्नततत्सरहिताद्देशरीराः लक्षणहिताःशिरवान्विताः अधममध्योत्तममंडपेक्रमेण पंचहस्तषट्हस्तसप्तहस्तहीर्घास्त्रिंशद्देगुलसत्र
वेष्टितस्थौल्याः शारवाद्वारेभ्यअग्रतः हस्तपरिमितदेशेप्रतिदिशंशारवाद्वयंयथाभवतितथाद्वारवत्तत्संचमांशेनहस्तमात्रं

वाकुशले उपवटकल्पयारोपणीयाः तदनंतरमध्यमध्यमोत्तमरूपेत्रिविधेपिमंडपेक्रमेणद्विहस्तदीर्घाणिसार्द्धहस्तद्वयदीर्घाणि
शारवादैर्घ्यार्धमानानियाप्रांतद्वयछिद्रवंतिकाष्ठानिरापितशारवानां मस्तकेतिर्यग्बिलि प्रवेशेनस्थापयेदित्यर्थः क्रियासारेलक्ष्योदुंबर
बोधिद्रुवटाः पूर्वादितक्रमात्।। तोरणानिच चत्वारीति वास्तुशास्त्रे।।अश्वत्थोदुंबरपूक्षवटशारवाश्चतानितु।।मंडपस्यप्रतिदिशंद्वाराण्ये
तानिकारयेदितिः।। द्वाराकारत्वा तारणेषु द्वारशब्दप्रयोगः यतुदक्षपश्चिमदक्षिणोत्तरपूर्वेषु अपसव्येनपश्चिमद्वारादिक्षेयमितितद्
संगतं पश्चिमेश्वत्थसंज्ञतंउत्तरेपूक्षतोरणमिति सोमशंभुनापि पूक्ष्योदुंबराश्वत्थवटजास्तोरणाः क्रमात्।।पूर्वादितोविधातव्या यद्वा
द्येतविपर्ययइति।।महत्रे।। देवास्तोरणरूपेण संस्थितायत्रमंडपेविघ्नविध्वंशनार्थंचरक्षार्थमधरस्यच।। न्यसेन्नयोधमेद्यांतुयाम्ये
चोदुंबरंतथा।।वरुण्यांपिप्पलंचैवकौबेर्यां पूक्षमंन्यसेत् सुशोभनंतुपूर्वस्यांरग्वेदादिसुमंत्रितं।।इषेत्वेतिचमंत्रेण सुभद्रारक्ष्यंतुदक्षि
णेसुकर्मरक्ष्यंतुधारण्यांसामवेदादिकेनतु शन्नोदेवीतिमंत्रेणसुहोत्रंस्त्रुवरंन्यसेत्।।तथा।। आलाभाद्येकमेवैर्वासर्वशासुनियेशये
त्इतिसिद्धांतसेखरेपि एकमेषामलाभेतुस्यात्तदभावेशमीद्रुमः जंबूखदीरसाराश्वनाशेवातोरणेस्मृतः इति।क्रियासारे अपक्वसत्वचः
सीदंत्युस्तोरणेक्षुभाः।। ।।तोरणमितिहत्यचास्तुशास्त्रे।। ।।पंचहस्तप्रमाणास्तेविस्तारेणद्विहस्तकाः षडंगुलानिचद्वासप्तहस्तास्तथो
तमइति मध्यनेषट्हस्तानुक्त्वाप्यथतिस्तेषा औचित्यादर्थात्परिमाणमितिकाश्यपोक्तेः विस्तारेणेतिषडंगुलानिचद्वास्त्रिंशतिचतुर्वेतिर्य
क्फलपरिमाणंषडंगुलानिषट्षडंगुलानि।। आग्नेयेविशेषः।। पूक्षोदुंबरकाश्वत्थवटजास्तोरणाक्रमात्।।शांतिभूतिबलारोग्य पूर्वा
द्यानामतःक्रमात् पंचषट्सप्तहस्तानिहस्तद्वातेस्त्रितोनिच तदर्धविस्तराणिस्युर्तान्यग्नेयजादिभिरिति शांत्यादिनामा नि
शेचयागेविषपाणिहस्तद्वयातमपितद्विषयमेवायद्वापंचमांशंन्यसेद्भूमौ सर्वसाधारणोविधीरियमेवास्यविकल्प्यः।। ।।शारदातिल
के।। ।।तिर्यक्फलकमानंतु रत्नभानामईमानतइति पत्रे मंडपद्वारबाह्येचवेदिमान्येनहिक्रमात् पूक्षमोदुंबराश्वत्थवटोत्थं
तोरणंन्यसेदिति ४२ तीर्यक्फलकानांमस्तकोपरि मध्येतिर्यक्फलकाष्ठकृतानिक्रमेणद्वशांगुल द्वादशांगुल चतुर्दशांगुलदीर्घा

णि चतुरंगुलसार्द्धचतुरंगुलं पंचांगुल दीर्घानिवा शंखचक्रगदापद्मानि पूर्वादिक्रमेण बिलप्रवेशेन रोपणीयानीत्यर्थः॥ ॥तदुक्तंवास्तुशास्त्रे- मस्तकेद्वादशांसे नशंखचक्रगदांबुजं। प्रागादिक्रमयोगेन न्यसेत्तेषांस्वदारजमिति॥अत्रद्वादशांशः॥शारवानामितिकुंडरत्नाकरकारः तीर्थ क्फलकस्येत्यन्ये॥ अतोविकल्पः॥ उभयोः प्रकृतत्वाविषेधात्॥आग्नेयहयशीर्षे पंचरात्रयोः तोरणस्तंभमूलेषुकलशान्मंगलांकुरान् प्रदद्या दुपरिष्टात्तु कुर्याच्चक्रंसुदर्शनमिति॥एतद्वचनानुसाराच्चतुर्दिक्षु चक्रमेवशक्तायें॥४४॥ ॥शैवेशूलनिवेशनमाह॥ ॥शैवेशूलत्रयंन्यस्या नवभिरथभवेरामचंद्रैकमातुत्यासोवेदांशतस्यादथवानिखननंद्विविवेदांगुलेस्तु॥४५॥ शिवोद्देश्यैकमर्णीतीर्थकफलकोपरि प्रतिदि शंमध्यदेशेऽभयांतयोश्च शूलत्रयं अथवामध्यदेश एवैकैकंशूलंबिलनिवेशनेनरोपनीयं तत्शूल मध्यमश्रृंगंसरलंशुवपार्श्वद्वयगतश्रृं गद्वयंतुकिंचिद्वक्रं॥ शूलदैर्घ्यंक्रमेणाधममध्योत्तमेषुतोरणेषु नवांगुलै एकादशांगुलैस्त्रयोदशांगुलैर्गदितं सर्वेषांस्वस्वचतुर्थांशेनबिलप्र वेशोपि अंगुलद्वयेनांगुलत्रयेणचतुरंगुलैश्चक्रमेणगदितश्शूलार्थः॥ ॥तदुक्तंमंत्रमुक्तावल्यां॥ ॥अग्नयो मध्यभागेचपट्टिकायांचशूलिका नीतिक्रियासारेपि॥तोरणंघटयित्वैवंमूर्ध्नीशूलत्रयंन्यसेदिति॥पिंगलामतेपि शूलेनचिन्हिताःकार्याद्वारशास्त्रुमस्तके॥शूलेनचांगुलैर्द्वैर्ध्यंतुरीयांशेनविस्मृतिः॥ रजुर्वैमध्यश्रृंगंस्यात्किंचिद्वक्रंचपक्षयोः प्रथमंतत्समाख्यातंद्व्यंगुलंरोपयेत्तथा शेषाणांद्व्यंगुलावृद्धिर्यावच्चांगुली वृद्धिरिति॥ शूलानामपिशंखादिस्थापनीयत्वात्स्वदारजत्वंन्यायप्राप्तमेवपत्तुक्रियासारे शूलहस्तायतंतेषांमितिहस्तायतत्वमुक्तंत त्रयाणांमिलित्वाबोध्यमेकमूलत्वानुरोधात्॥ ॥इदानींमाहुतिसंख्ययाकुंडव्यवस्थामाह॥ ॥शताद्धेहोमेचशतेसहस्रेऽयु तेचलक्षेप्रयुतेचकोटौ कुंडंक्रमात्स्वनीरत्निहस्तद्व्यध्यंगनागैस्तु करैःप्रदिष्टं॥४६॥ ॥पंचाशदाहुतिहोमेमुष्टिमानं॥ ॥ शतहोमेऽरत्निमानं अरत्निशब्दोयद्यपिबहुषुस्थलेषुहस्तमात्रेप्रयुक्तः तथापिहोमविशेषानुरोधासारिभाषिकःसार्द्धद्विविंशत्यं गुलात्मकोत्रगृह्यते॥ सहस्रहोमेहस्तमानं दशसहस्रहोमेद्विहस्तं लक्षहोमेचतुर्हस्तं दशलक्षहोमेषड्हस्तं कोटिहोमेऽष्ट हस्तं॥ ॥तदुक्तंभविष्यपुराणे॥ ॥मुष्टिमानंशताद्धेचशतेचारत्निमात्रकं सहस्रेत्थहोतव्येकुर्यात्कुंडंकरात्मकं द्विहस्तमयुते

तच्चलक्षहोमेचतुःकरं॥दशलक्षमितेहोमेषड्करंसंप्रचक्षते॥अष्टहस्तात्मकंकुंडं कोटिहोमेषु माधिक्रमिति॥४६॥ ॥शारदातिलकवचनेनविरोधमाशंक्यनिराकरोति॥ ॥यद्धस्तमात्रंगदितंतुलक्ष्येलक्षस्यवृद्ध्याचुकरस्यवृद्धिः यावद्दशस्युर्हुतमंद्वयेहो मद्वयेतत्क्रमतोवधेयं ४७ शारदातिलककारेणलक्षहोमेहस्तमात्रंकुंडमुक्त्वा अनंतरंएकैकलक्षवृद्ध्याएकैकहस्तवृद्धिर्दशल क्षपर्यंतंमुक्त्वा तत्रयस्मिन्लक्षहोमेशीघ्रहाहीघृतपुष्पादिहोमेउपलक्षणमेतत् एककर्तृकबहुदिनसाध्यहोमोवातत्रैकहस्तं कुंडंकर्तव्यमितिज्ञातव्यं॥एवमेवलक्षद्वयेलक्षत्रयेचव्यवस्था॥यत्रचतुर्लक्षादिहोमेबहुकालसाध्यद्रव्यहोमः॥बहुकर्तृकश्चतत्रचतुर्हस्तादिकुंडमिति॥ ॥तथाचशारदातिलके॥ ॥एकहस्तमितंकुंडमेकलक्ष्येविधीयते॥लक्षाणांदशकंयावत्ता वद्धस्ते नवर्द्धयेत्इति॥ ॥ग्रंथांतरेपि॥ ॥केचिद्धस्तंलक्षहोमेद्विहस्तंलक्षद्वंदेवन्हिहस्तंत्रिलक्षे॥होमेकुंडंचैवलक्षेऽधि हस्तंप्राहुर्होमांपंचकंपंचलक्षे॥रसहस्तंरसलक्षेसप्तकरंससलक्षेस्यात्॥वसुलक्षेवेदबसुहस्तं नवलक्षेचनवकरंकुंडं दशलक्षेदशहस्तं॥दशहस्तमेवकोटिहोमेषु॥दशहस्तान्नहिकुंडंपरमस्तिमहीतलेमुष्मिन्नृणां॥४७॥ ॥सिद्धांतसेखरवचनं॰ रुद्रोक्तवचनविरोधंचनिराकरोति॥ ॥पंचायुतेषु ५०००० नियुते१००००० प्रयुते१०००००० द्विनिघ्ने २००००० पंचाहते ५०००००० दशहते१००००००० गदितंक्रमेणकुंडकरेर्गुण३मितैश्चतिः४मिश्रबाणे५रंगै६र्हयै७र्नृप८ तिमिश्रिरद्रयहोमे॥४८॥ सिद्धांतसेखरे पंचाशत्सहस्रेषुत्रिहस्तंलक्षहोमेचतुर्हस्तं दशलक्षेपंचहस्तंविंशतिलक्षे षड्हस्तं पंचाशल्लक्षे समहस्तंकुंडमुक्तं॥स्कंदपुराणेच कोटिहोमेषोडशहस्तंकुंडमुक्तं तदुभयमपि बहुकालसाध्यद्रव्यक होमपरमित्यर्थः॥ ॥तदुक्तंसिद्धांतशेखरे॥ ॥लक्षार्द्धेत्रिकरंकरकुंडंलक्षहोमेचतुःकरं कुंडंपंचकरंप्रोक्तं दशलक्षा हुतौक्रमात्॥षड्हस्तंलक्षविंशत्याकोट्यर्द्धेसप्तहस्तकमिति॥ ॥शतार्द्धे५०चशते१००सप्र५००सहस्रेपर्वसिःक्रमात् नागेंदुसूर्यै२रुपै१६कुंडंनरवे२०कैश्चित्समीरितं॥४९॥ तथायुतेच १०००० नियुते१००००० प्रयुते१०००००

कोटिसंमिते१०००००००० अर्बुदैश्च१०००००००० करैः कुंडंचंद्र१ ख२ ध्व्यं४। ग६ नाग८ कैः॥ ५०॥ ॥इयस्यस्पष्टार्थः॥ ॥अ

थकुंडानां फलविशेषकथनपूर्वकं प्राच्यादिमुक्तक्रमेण निवेशनमाह॥ ॥प्राच्यांस्तंभोब्धिकोणंभगसदृशमथोभोगदंवन्हिकोष्ठंयाम्ये रक्षेंदुभ्रस्योकुणपदिशितथावेरहत्याख्यिकुंडं वृत्तंशांतौ प्रतीच्यां एवनादिशितथोच्चाटनेस्यात्षडस्रंसौम्येषुष्टौचपद्मंसुखजन शास्त्रभीशानकोष्ठे॥ ५१॥वैरीशरीरस्तंभेउद्देश्ये प्राक्कोष्ठे चतुरस्रं१ मोहेउद्देश्येआग्नेयकोष्ठे योन्याकारं॥ २॥शत्रुमरणेउद्दे शे दक्षिणस्यामर्धचंद्राकारं॥ ३॥ प्रीतिमतोः परस्परंविरोधेउद्देश्येनैर्ऋतिकोष्ठे त्रिकोणं॥ ४॥ रोगादिशांतावुद्देश्यायांपाश्चिमकोष्ठे वर्तुलं५ शत्रुच्चाटनेउद्देश्ये२ ईशानकोष्ठे अष्टकोणंकुंडंकर्तव्यमित्यर्थः॥ वायव्यकोष्ठेषट्कोणं६ पुष्टायुद्देश्यायांउत्तरकोष्ठेपद्माकारं७ सुखेउद्देश्ये॥ तदुष्टकामुके॥ ऐंद्र्यांस्तंभेचतुःष्कोणं आग्नेयेभोगेनागाह्वति॥ चंद्रार्द्धंमारणेयाम्येद्वेष्येनैर्ऋत्रिकोणकं वारुण्यांशांतिकेवृत्तं षडस्र्युच्चाटने निले॥ उदीच्यांपौष्टिकेपद्मं रौद्र्यां१ मष्टास्रिमुक्तिदमिति॥ पिंगलामते॥ कुंडंकुशेशयाकारंमुत्तरेवश्यकर्मणि॥ षडस्र्युच्चाटनेनाथवर्द्धे दुमारणेयमे॥ वेदास्रंस्तंभनेप्राच्यां आकर्षेग्नेयभागाह्वानि वारुण्यांशांतिकेवृत्तं द्वेषेचाष्टास्रिमुक्तिदमिति दिक्॥ प्रसंगादिक्रमेणकुंडमुख योनिभेदमाह॥ आचार्यपूर्वानिलाग्न्यगताः सौम्याननादक्षिणयोन्यः मुक्ताः॥ प्राग्ननाः व्यस्रिमुखास्तद्वन्ये तथाप्रतीचीरुचि तयोनिकाश्च॥ ५१॥आचार्यपूर्वाक्षेयदक्षिणकुंडानि उत्तरदिङ्मुखानिदक्षिणमेखलामध्यस्थितयोनिमुक्तानिकर्तव्यानित्यर्थः॥ ॥सि द्धांतशेखरे॥ ॥योन्यास्यमुच्यतेकुंडं आग्नेय्यामुत्तरामुखं प्रजाहेतोश्चतापेस्यादर्धचंद्रमथोच्यते याम्येतन्मारणेशस्तमुत्तराभिमुखंसदा निरूपितेव्यस्रिकुंडंस्याद्विद्वेशेपूर्ववत्कमेमिति आग्नेयोपूर्वाग्निभ्याम्यकुंडानांयोनिस्यादुत्तरानना पूर्वाननातुशेषाणांइशान्येन्यतरानन नयोरिति एवंसतिहोमकर्तापिपूर्वादिकुंडत्रयेउत्तराभिमुखः नैर्ऋतादिपंचकुंडेषुपूर्वाभिमुखइति ५२ वेदिकुंडानांमध्येपरित्याज्य स्थलप्रमाणमाह वेदीमितेः सर्वतोवेदिपादंसल्लाकुर्यात्सांगगतान्यथोक्तान् केचित्प्राहुश्चांतरंरामचंद्रैर्मध्येवेदीकुंडयोरंगुलैस्तत् ५३ वेदीसमंततः पूर्वादिदिक्षु अष्टसूत्राणि दत्त्वावेदिमिति मारण्यसूत्रोपरिसर्वतोवेदिचतुर्थांशपरिमितंस्थलंविहायकुंडमेखलास

सहितानि चतुरस्त्रादीन्यष्टकुंडानियथादिक्सूत्राणितेषांक्रमेणमध्येपतंतितेथाकर्तव्यानि॥ केचित्तुवेदीकुंडयोर्मध्येत्रयोदशांगुलं परि मितमंतरमुक्तं॥ ॥तदुक्तंशौनकेशंभुना॥ ॥वेदीपादांतरे त्यक्त्वेति सिद्धांतशेखरे॥ त्यक्त्वेत्यनुषंगिमिति॥ ॥यत्तुनारदीये॥ कुं डवेद्यंतरंचैवसपादकरसंमितमितितत्संचरत्नवेदिकाभिप्राये यद्यपिकथासारे वेदिकाकुंडयोर्मध्येहस्तद्वितयमंतरमिति तदपिचतुर्विंश तिहस्तमंडपमित्यविरोधः॥ ॥वशिष्टसंहितायां॥ ॥वसिष्टसंहितायांतुत्रयोदशांगुलैःपरिमितांतरात्कपरित्यागोक्तिरनाकरोतीत्ये संक्षावेदिकायाश्चतुर्दिशंकुंडानिस्वागमोक्तानि विदध्याद्विधिवद्बुधइति तथाचपूर्वोक्तेनाधिकत्वः एवंसतिकेशांचिद्द्वादशांगुलेत्यंतरा मेखलाअपितत्रनकर्तव्याइतिसूचितं॥ ५३॥ ॥अथकुंडानामुद्धारउच्यते॥ ॥तत्रयोन्यादिसर्वकुंडानां चतुरस्त्रप्रस्तावात्पूर्वोक्ति चतुरस्त्रसाधनप्रकारापेक्षयाप्रकारांतरेण प्रथमंचतुरस्त्रसाधनमाह प्रागायामेक्षशंकून्स्वदलयुगलांतमध्येपुरत्वापाशौतन्मानरज्जोरपि समनरयोः प्राग्यमध्यांककर्षात् स्वान्यच्छंकुयुग्मंयमद्यधनदहिशोर्द्वाक्षिसपाशेर्मध्याकर्षे श्चतुर्भिश्चिति समगुणैः शंकुभिश्चाब्धिकोणं स्वेष्टकुंडादिपरिमाणेप्रागपरदेर्घेअर्द्धद्वयाद्यैोः दैर्घ्येभियप्रांतयोर्मध्येचसमांतरालान् पंचशंकून्निरवायस्वेष्टकुंडादि परिमितसूत्रप्रांतयोः पाशौकृत्वातौपाशौद्वितीयचतुर्थशंकोः प्रक्षिप्यरज्जुमध्यभागकृतचिन्हस्यदक्षिणतः उत्तरतश्चक्रमेणाकर्षणात् चिन्हद्वयंकृत्वा मध्यादु परिव्यासार्द्धपरिमितसूत्रेणशंकूत्वादिकृशंकुयुग्मेशंकुयुग्मेपाशौप्रक्षिप्यप्रक्षिप्यक्रमेणार्द्धकर्षनेनशंकून्निरवनने नरकोणचतुष्ट यंप्रसाध्यचतुर्भिःसमसूत्रैः समचतुरस्त्रंकुंडंभवतीत्यर्थः ५४ अष्टास्रमांशमुच्चरज्वापिचतुरस्त्रसाधनमाह स्वेष्टक्षेत्रगुणेजिनाष्टम लवेनाद्यंतरात्तन्मिते शंकूपार्श्वयुगेनिरवायचतस्ततः प्रांतद्वयेचापरौ पाशौपाश्चिमदिक्स्थयोश्चरणयोक्षिप्तार्द्धसंकर्षणाच्छ्रोणीशंकूदि शस्थौयथानरयोर्दक्षौचसंसाधयेत् ५५ चिकीर्षितव्यासपरिमितेसूत्रेनदृष्टमांशेअधिकेवर्द्धिते अंतयोः पाशौकृत्वाचिकिर्षिता र्द्धपरिमितेआकर्षयाचिन्हंकृत्वा मध्यचिन्हादुभयपार्श्वयोरष्टमांशेशंकुद्वयंनिरवाय अनंतरं प्रांतद्वयेपि शंकुद्वयंनिरवाय प्रतीची शंकोर्यथा प्रांतशंकुसन्निहितव्यासर्धचिन्हंपतंतितथापाशौकृत्वा प्रक्षिप्यव्यासार्द्धचिन्हाकर्षणेनश्रोणिद्वयप्रासाध्यप्राचीशंकोः

पार्शवे प्रक्षिप्यां सहृयसाधयेदिति याचतुरस्रंभवति ॥ ५५ ॥ व्यासद्विगुणरज्वापिचतुरस्रसाधनमाह ॥ इष्टास्वेष्टंद्विनिघ्नंगुणमथ दलयोपार्श्वयोश्चिन्हयुक्तं प्रांतद्वंद्वस्थपार्शवे वरुणमघवदिक् शंकुयुग्मंप्रविश्य ॥ आकृष्टपार्श्वचिन्हे प्रतिदिशमथोरोपितेष्वब्धिशंकुं ब्रह्मांके वेदरंध्रैर्भवति समभुजंपूर्वदिश्याब्धिकोणं ॥ ५६ ॥ स्वाग्निप्रेतक्षेत्रपरिमितंसूत्रंद्विगुणंबद्ध्वापित्रांतहयेपार्शवे इष्ट्वापार्शवयोरुपरि भद्वंद्वयेचिन्हहयंकृत्वाकृतचिन्हद्वयोपरिचतुर्थांशद्वयेचाकर्षचिन्हद्वयंकृत्वाषष्टिमपूर्वदिक्रोपितशंकोः पार्शवद्वयंप्रवेश्य एकेकविदिशिचतुर्थांशचिन्हं आकर्षितेसति प्रत्याकर्षणं चतुर्षु विदिक्षुक्रमेणशंकुचतुष्टयेरोपितेसति चतुर्भिः सूत्रैः पूर्वदिशितुल्यपरिमाणभुजं समचतुरस्रंकुंडंभवतीत्यर्थः ॥ अत्रतुल्योभयकर्षणत्वात्समानसकलभुजत्वाच्चतुल्यसजोतुल्यचतुर्भुजेचतथामनेनक्षुज्जकोटिघातइतिभास्कराचार्यवचनाच्चतुर्विंशतिंगुलभुजत्वाच्चमितस्यभुजस्यचतुर्विंशतिंगुलमितयाकोट्यापरस्परंगुणनेषट्सप्तत्यधिकानिपंचशतांगुलानि ५७६ क्षेत्रफलंभवति ॥ समलंबकचतुरस्रेचतुर्विंशतिंगुलपरिमितत्वान्मुख्यस्यापितावन्मात्रत्वाद्भूवदनैक्यार्द्धस्यचतुर्विंशतिंगुलमितस्यचतुर्विंशतिंगुलपरिमितलंबेनापिगुणनेपूर्वोक्तमेवान्यूनानेतिरिक्तफलंभवति ॥ एतदेवफलं यथायोन्यादिसप्तकुंडव्यायातितथातानिकुंडानिसंपादनीयानि ॥ तस्माद्योन्यादिसर्वकुंडानां चतुरस्रमेवप्रकृतिर्भुवं ॥ ॥ तदुक्तंसिद्धांतसेखरे ॥ ॥ योन्यादिसर्वकुंडानिचतुरस्राद्भवंतिहि लक्षणंचतुरस्रस्यध्रुवंतस्मात्तमोच्यते ॥ ॥ क्रियासारेपि ॥ ॥ चतुष्पादंचतुःकोणमेतत्क्षेत्राद्भवंभवेत् चतुरस्रादिकुंडानां सर्वेषामत्रसंभवइतिग्रंथांतरे क्षेत्राद्यंचतुरस्रमत्रजनयेदन्यानिकुंडान्यपीति चतुरस्रमिदंप्रोक्तंसर्वकुंडेषुकारणमिति ५६ चतुरस्रक्षेत्रतिकयोनिकुंडमाह वेदास्त्र्यासंसूत्रंशून्य२४खय८खविते सौम्यदिग्भक्षेत्रभागान्संयद्वैकैस्यरामै३र्गगनिकरलवै२० साकमेकंचलत्वा कलाध्यंशेनमध्यान्निवृत्तिदहनपोः कोष्टयोरर्द्धचिन्हे कृत्वासूत्रमद्वयांतावधिगुलशुगुलाभागंस्याद्भागपं ५७ क्षेत्रचतुरस्रमध्यसूत्रंचतुर्विंशतिभागांगंकृत्वा एकस्यभागस्यत्रिभिर्विंशांशैः सहितान्पंचभागान् उत्तरदिशिमध्यसूत्रेसंबद्धंतत्रचिन्हं कृत्वा प्रागपरदक्षिणोत्तरसूत्रद्वयेचतुष्पष्टिकृतस्यचतुरस्रस्याः

को

१२

